# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१७)

## ०४.०३.२०१३

# ५०४. पुंयोगादाख्यायाम् (४.१.४८)

- पदद्वयम् । पुंयोगाद्, आख्यायाम् ।
- ‘अन्यतो ङीष्’ (४.१.४०) इत्यतः ‘ङीष्’ इति अनुवर्तते ।
- या पुमाख्या पुंयोगात् स्त्रियां वर्तते, ततो ङीष् स्यात् ।
- पुंयोगात् इति ।

- गोपस्य स्त्री गोपी ।
- गोपस्य स्त्रीति ।

# पालकान्तान्न (वा)

- गोपालिका ।
- अश्वपालिका ।

# सूर्याद्देवतायां चाब्वाच्यः (वा)

- सूर्याद्देवतायामिति ।
- सूर्यस्य स्त्री देवता सूर्या ।
- देवतायां किम् - सूरी कुन्ती, मानुषीयम् ।
- मानुषीयमिति ।

# ५०५. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् (४.१.४९)

- पदद्वयम् । इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिम-अरण्य-यव-यवन-मातुल-आचार्याणाम्, आनुक् ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति अनुवर्तते ।
- एषाम् आनुगागमः स्यात् ङीष् च ।
- इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते, तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते ।
- इतरेषां चतुर्णाम् उभयम् ।

- इन्द्राणी ।
- वरुणानी ।
- भवानी ।
- शर्वाणी ।
- रुद्राणी ।
- मृडानी ।

- हिमारण्ययोर्महत्त्वे (वा)
- महद्धिमं हिमानी ।
- महदरण्यम् अरण्यानी ।

- 'यवाद्दोषे' (वा)
- दुष्टो यवो यवानी ।

- यवनाल्लिप्याम् (वा)
- यवनानां लिपिः यवनानी ।

- मातुलोपाध्यायोरानुग्वा (वा)
- मातुलानी, मातुली ।
- उपाध्यायानी, उपाध्यायी ।

- 'या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः' (वा)
- उपाध्यायी, उपाध्याया ।
- या तु स्वयमेवेति ।

# आचार्यादणत्वं च (वा)

- आचार्यस्य स्त्री आचार्यानी ।
- आचार्यानीति ।

- पुंयोग इत्येव, आचार्या, स्वयं व्याख्यात्री ।
- स्वयं व्याख्यात्रीति ।

# अर्यक्षत्त्रियाभ्यां वा स्वार्थे (वा)

- अर्याणी, अर्या ।
- स्वामिनी वैश्या वा इत्यर्थः ।

- क्षत्त्रियाणी, क्षत्त्रिया ।
- पुंयोगे तु - अर्यी । क्षत्त्रियी ।

- कथं 'ब्रह्माणी' इति ।
- ब्रह्माणम् आनयति जीवयतीति 'कर्मण्यण्' ।
- ब्रह्माणमिति ।